श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीवण्शठकोप श्रीश्रीनिवासनिगमान्त यतीन्द्र महादेशिकैरनुगृहीतं

# ॥ श्री श्रीनिवास मङ्गळाशासनम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री श्रीनिवास मङ्गळाशासनम् ॥

सर्व मङ्गळसंभूतिस्थान वेङ्कट भूधरे।
नित्यक्लृप्त निवासाय श्रीनिवासाय मङ्गळम् ॥ 1 ॥

आश्रितार्थितकल्पाय कौस्तुभालङ्कृतोरसे।
ज्ञानशक्त्यादिपूर्णाय श्रीनिवासाय मङ्गळम् ॥ 2 ॥

नित्य निर्धूतहेयाय दिव्यमङ्गळमूर्तये।
अञ्जनाचलभूषायै श्रीनिवासाय मङ्गळम् ॥ 3 ॥

वेद वेदान्तवेद्याय कारणाय महात्मने।
प्राप्याय प्रापकाय स्यात् श्रीनिवासाय मङ्गळम् ॥ 4 ॥

सर्वलोक शरण्याय चिदचिद्वस्तु शेषिणे।
श्रीवत्साङ्कितवक्षाय श्रीनिवासाय मङ्गळम् ॥ 5 ॥

स्वीय घण्टांश वेदान्तदेशिकानन्दहेतवे।
सेतवे सर्वलोकानां श्रीनिवासाय मङ्गळम् ॥ 6 ॥

वाणी वल्लभमुख्यार्चा तोषिताय महात्मने।
विविधाश्चर्य वर्याय श्रीनिवासाय मङ्गळम् ॥ 7 ॥

दिव्यसूरि समाक्रान्त निजवासादि कोटये।
निकृष्टोत्कृष्ट तुल्याय श्रीनिवासाय मङ्गळम् ॥ 8 ॥

॥ इति श्री श्रीनिवास मङ्गळाशासनं समाप्तम् ॥